अङ्क-२८ वेदविद्या
जुलाई-दिसम्बर २०१६ ISSN-2230-8962

# वर्त्तमाने वैदिकवाङ्मयस्योपयोगिता

**डॉ.शैलेन्द्रप्रसाद उनियालः**

वैदिकवाङ्मयं निखिलोदधिवदपारमगाधं चानुमन्यतेऽशेषविशेषशेमुषीवद्भिस्तपोधनैः हिमवानिव ससारं, प्रसारं चास्याः **सा प्रथमा संस्कृतिर्विश्ववारा**[1]त्वेन सृष्टिप्रपञ्चस्याद्यवाङ्मयत्वेन श्वेताश्वेतरोपनिषदि श्रीमद्भागवते च सुप्रसिद्धम्। **यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै। तं ह देवमात्म बुद्धि प्रकाशं मुमुक्षुर्वै शरणं प्रपद्ये॥ कालेन नष्टा प्रलये वाणीयं वेद सञ्ज्ञिता। मयादौ ब्रह्मणे प्रोक्ता धर्मो**[2] **यस्यां मदात्मकः**[3]॥ इति॥

वेदा हि भारतीयानां गौरवभूताः। पुण्यवती भारतीया संस्कृतिः वेदाधारिता वर्त्तते। कस्यचिदपि राष्ट्रस्य समुन्नतिः। तत्रत्याचारेण व्यवहारेण चाभिवन्द्या भवति।

एतस्मिन् विषये भारतवर्षस्य महिमा सर्वानतिशेतेतराम्। तस्माद्धि कथ्यते-

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व मानवाः॥**[4]

स्वकीयाचारेण व्यवहारेण त्यागेन तपसा च सर्वतः पावितेयं भूमिः देवानां कृतेऽपि सर्वदा सर्वथा च समादरणीया स्मर्यते। या वेदस्मृतिशास्त्रविन्मुनिवरैर्जुष्टा, सुखैकास्पदा, दैवीसम्पदलङ्कृता भगवता श्रीशेन संरक्षिता ।

**या वर्णाश्रमसारहारहृदयाधर्मार्थमोक्षप्रदा।**
**नित्या विश्वहितैषिणी विजयते सा वैदिकी संस्कृतिः॥** इति सुगीतं सुभाषितकारेण विदुषा ।

भारतवर्षे विदेशेषु चाप्यनेकेषु स्थलेष्वभिव्याप्तेयं संस्कृतिः वेदान् पुरस्कृत्यैव प्रसरति ।वैदिक-वाङ्मयस्येयमेव महती समुपयोगितास्ति यतोहि वैदिकवाङ्मयस्य वैदिकसंस्कृतेश्चान्योन्याश्रयः सम्बन्धः वैदिकवाङ्मयं नितरां लोकहितकारकमत एव तदवतीर्णे हेतुं दर्शयन्नाह यास्कः[5] "पुरुष विद्यानित्य-त्वात्कर्मसम्पत्तिर्मन्त्रो वेदे" स मन्त्रः सम्यगनुष्ठितः सुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति। यज्ञाश्च देवाः साधूच्चारणक्रियाभ्यामेव फलदा भवन्ति, नान्यथा। यथा लोकेऽपि अशुद्धे पात्रे दुग्धस्थापने

---

[1] यजुर्वेदः ७/१४
[2] श्वेताश्वेतरो. ६/१८
[3] श्रीमद्भागवतम् ११/१३/३
[4] मनु. २/२०
[5] निरुक्तम् १/१/२

आतञ्चने वा दुग्धं न शुद्धं दधित्वन्नाप्नोति, वैपरीत्यं प्रजायते। तथा हि पुरुषस्य विस्मरण-शीलत्वादनियतत्वाद्धेतोः वेदे मन्त्राः समाम्नाताः। एतेषां मन्त्राणां गर्भाधानादि संस्कारेषु महती विशिष्टा चोपयोगिता ऋषिभिः समुपदिष्टा।

ते च संस्काराः अष्टचत्वारिंशत् - यदाह गौतमः[६] –

"गर्भाधानं पुंसवनं सीमन्तोन्नयनं जातकर्म नामकरणान्नप्राशन चौलोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानमष्टका पार्वणः श्राद्धं श्रावण्याग्रहायणी चैत्री आश्वियुजीति सप्तपाकसंस्थाः अग्न्याधानमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबन्धः सौत्रामणीति सप्त हविर्गृह्यज्ञसंस्थाः अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्राप्तोर्याम इति सप्तसोमयज्ञसंस्था इत्येते चत्वारिंशत्संस्काराः। अष्टावात्मगुणाः - दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो माङ्गल्यमकार्पण्यमस्पृहेति। यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च स ब्राह्मणः सायुज्यमवाप्नोति इति। तत्रैते पुंसः संस्काराः समीचीनदिवसेष्वनुष्ठिताः सन्तोऽभिहितफलदातारो भवन्ति; इति तु भारतीयैः आजन्मतः मरणान्तमेव नह्यपितु मरणोपरान्तमपि आत्मनः शान्तये सद्गतये च और्ध्वदैहिकसंस्काराः श्राद्धादिकानि कर्माणि कार्यन्ते । तत्र पूर्वकाण्डोक्तस्य धर्मस्य ज्ञानं पुष्पं । उत्तरकाण्डोक्तस्य ब्रह्मणो ज्ञानं च फलं मन्यते; यथा लोके पुष्पं फलोत्पादकं भवति, तथा वेदानुवचनादि-धर्मज्ञानमनुष्ठानद्वारा फलात्मकब्रह्मज्ञानेच्छां जनयति। "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन"।[७]

एवमेव गीतायां भगवतोदितं[८] प्रजापतिः प्रजया सहैव यज्ञान् सृष्ट्वोवाच-एष यज्ञः भवतां वाञ्छितार्थदोऽस्ति अत्रैव गीतायां यज्ञभाविता देवा तृप्ता यजमानाय इष्टान् भोगान् दास्यन्ते परञ्च प्रकृति-प्रदत्तपदार्थानां यो प्रकृतये समाजाय राष्ट्राय वा अदत्त्वा भुङ्क्ते स वै चौर इति सञ्ज्ञया निन्दितः सन् अघायुः[९] इन्द्रियारामः[१०] व्यर्थं हि तस्य जीवनमिति।

अतः यज्ञशिष्टभागं प्रसादरूपेण अन्येभ्योऽपि विभज्य भोक्तारः सकलकिल्विषैः मुच्यन्ते यद्यपि "वेदा हि यज्ञार्थमभिप्रवृत्ताः"[11] वेदानां मुख्यप्रयोजनं यज्ञोऽस्ति, तथा च **"यज्ञैश्च महायज्ञैश्च ब्राह्मीयं क्रियतेतनुः"**[१२] इयं तन्वी यज्ञेनैव देवत्वं जीवत्वाच्छिवत्वं नरत्वान्नारायणत्वं प्राप्नुयादिति वैदिकवाङ्मये महल्लक्ष्यं प्रबोधितम्।

---

[६] मुहूर्तचिन्तामणि, संस्कारप्रकरणम्

[७] बृ.उ. ४/४/२२

[८] गीता ३/१०

[९] केवलाघो भवति केवलादी (ऋग्वेद १०/११७/६ )

[१०] गीता ३/१२,१६

[11] वेदाङ्गज्योतिषम्, श्लोकः ३

[१२] मनु. २/२८

एवं महर्षिवेदव्यासशिष्येण सामगेन जैमिनिना प्रतिपादितं यत् आम्नायस्य क्रियाराहित्यमानर्थक्यं स्यात्[१३] अतः क्रियार्थत्वं हि आम्नायस्य मुख्यो रुपः, लोकेऽपि ह्युच्यते ज्ञानं भारः क्रियां विना, यस्तु क्रियावान् स पण्डितः। शुक्लयाजुषाम्नाये वाजसनेयिसंहितायां वाजश्चेत्याद्यारभ्य आयुर्यज्ञेन कल्पताम्[१४] इति ऊनत्रिंशति मन्त्रेषु वसोर्द्धारायाः समर्पणे मानवोचितोपयोगीनि वस्तुजातानि अपेक्षितानि तथा च स्वर्गोऽपि अमृतत्वं च यज्ञेन मह्यमुपभोगक्षमा भवन्तु इत्यर्थः महीधरेण गृहीतः।
वर्त्तमाने राष्ट्रियैकताया अभावे सति परस्परमखण्डतायै राष्ट्रसंरक्षणाय वेदः समुपदिशति -

**सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।**
**देवा भागं यथा पूर्वे सञ्जानाना उपासते ॥**[१५]
**सह नाववतु ---० ।**
**समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति**[१६] **॥**

मनसा वाचा कर्मणा च सर्वदा समानेन भवितव्यम्। समाजस्य राष्ट्रस्य च सर्वथा समुन्नत्यै विचार-साम्यं मतैक्यं सामञ्जस्यं चाभीष्टमस्ति।

**आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी**[१७] **--------०। "वयं राष्ट्रे जागृयाम पुरोहिताः"**[१८]
**वयं स्वकीये राष्ट्रे अप्रमत्ताः पुरोगामिनः प्रबुद्धाः भवेम।**
**इयं प्रार्थना वर्त्तमाने राष्ट्रहितायातीव महत्त्वपूर्णा वर्त्तते।**

राष्ट्रस्य सकलाङ्गविकासाय सर्वसमृद्धये च समितिषु विधानसभासु लोकसभासु समानः मन्त्रो भवेत् अस्य साम्यवादस्य स्थापनाय ऋषिरुपदिशति -

**समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।**
**समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि**[१९] **॥**

ये वेदविहितेन संस्कारेण संस्कारिताः भवन्ति, ते स्वपितरौ गुरुजनान् प्रति च श्रद्धाभावं प्रकटयन्ति परञ्चाधुनिक समाजे न तथा वयं पश्यामः अतःसहृदयतायै परस्परं प्रीतये ऋषिणा मन्त्रः समुपदिश्यते–

**सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।**
**अन्यो अन्यमभिहर्यत वत्सं जातमिवाघ्न्या**[२०] **॥**

---

[१३] जैमिनिसूत्रम् १/२/१
[१४] वाजसनेयीसंहिता १८/१-२९ मन्त्राः
[१५] ऋग्वेदः १०/१९१/२
[१६] ऋग्वेदः १०/११/४
[१७] वाजसनेयीसंहिता २२/२२
[१८] वाजसनेयिसंहिता ९/२३
[१९] ऋग्वेदः १०/१९१/३
[२०] अथर्ववेदः ३/३०/१

वर्त्तमाने आधुनिकशिक्षया शिक्षिताः मानवाः पितरौ भ्रातरं च परित्यज्य पत्न्या साकम् एकाकी एव निवसन्ति । तथापि गृहे कलहो जायते; तथा न स्यात् संयुक्तपरिवारे भगिन्यौ परस्परं शान्त्या स्थित्वा पितृसमादरं च भवेत् इति कामनया मन्त्रः प्रवर्त्तयति –

**अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।**
**जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम्**[२१] ॥
**मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।**
**सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया**[२२] ॥

वैदिकवाङ्मये ऋषयः स्वतपसा योगबलेन चाधुनिकसामाजिकीं परिस्थितिं समनुलक्ष्य मन्त्रान् सम्प्रादुः। तस्मादस्य वैदिकवाङ्मयस्य वर्त्तमाने काले महती सूपयोगिता आसीत् अस्ति भविष्यति च। यतोहि सर्वज्ञानमयत्वेन सर्वकालप्रायोगिकत्वेन च ग्राह्याः वेदाः ॐ शमिति॥

**डॉ.शैलेन्द्रप्रसाद उनियालः**
वेदविभागे प्राध्यापक
श्री सन्त नागपाल संस्कृत महाविद्यालय एवं
शोध संस्थान, छत्रपुर, नईदिल्ली - ७४

[२१] अथर्ववेदः ३/३०/२
[२२] अथर्ववेदः ३/३०/३